ODISHA BOARD

QUESTION PAPER 2024

DOWNLOAD PDF

Orissa Council of Higher Secondary Education Examination

aglasem.com

SET–A

Roll No. ☐

Total No. of Printed Pages—11

733 R/E

(Regular/Ex-Regular)

MIL (S)

(Arts/Commerce/Science)

(For Students registered in 2021 and 2022)

2024 (A)

MIL (SANSKRIT)

ARTS/COMMERCE/SCIENCE

Full Marks : 100

Time : 3 hours

The figures in the right-hand margin indicate marks

*Answer **all** questions as per instructions given under each Group*

Candidates are required to give their answers in their own words as far as practicable

Short-type questions are to be answered serially and continuously

schools.aglasem.com

aglasem.com

GROUP—A

1. (क) शुद्धम् उत्तरं चिनुत— 1×3=3

(i) सः (शकुनिलुब्धकः) ____ हत्वा तेषां विक्रयं करोति।

(पतङ्गान्, पशून्, मृगान्)

(ii) आर्षग्रन्थानां रचना तु ____ भवति।

(सूत्ररूपा, सरला, अलंकृता)

(iii) मिष्टान्नसेवनेन तौ उभौ ____ संजातौ।

(सन्तुष्टौ, परिपुष्टौ, प्रीतौ)

(ख) शुद्धम् उत्तरं चिनुत— 1×2=2

(i) वीतरागभयक्रोधः स्थितधीः ____ उच्यते।

(मुनिः, गुरुः, कविः)

(ii) प्रजानामेव भूत्यर्थं स ताभ्यो ____ अग्रहीत्।

(बलिम्, करम्, धनम्)

(ग) अतिसंक्षेपेण उत्तरं लिखत— 1×2=2

(i) शकुनिलुब्धकस्य कथं न कश्चित् सुहृत् आसीत्?

(ii) राज्ञः आदेशेन कः आहूतः?

(घ) अतिसंक्षेपेण उत्तरं लिखत— 1×3=3

(i) सङ्गात् किं संजायते?

(ii) सहस्रगुणमुत्स्रष्टुं रविः किम् आदत्ते?

(iii) प्रलयपयोधिजले केशवः किं धृतवान्?

(ङ) संक्षेपेण उत्तरं लिखत— 2

व्याधः केन रूपेण प्रकृतिस्थः संजातः?

अथवा

कः स्वप्रयत्नेन ब्रह्मर्षिपदं प्राप्तवान्?

(च) संक्षेपेण उत्तरं लिखत— 2

कः वेदवित् इति उच्यते?

अथवा

कथं दिलीपस्य गुणाः सप्रसवा इव आसन्?

(छ) उत्तरं लिखत— 3

कपोतः आदर्शः इति व्याधः कथम् अमन्यत?

अथवा

सुश्रुतस्य परिचयं लिखत।

schools.aglasem.com
aglasem.com

(ज) उत्तरं लिखत— 3

नरकस्य त्रिविधं द्वारं वर्णयत।

अथवा

केशवस्य कच्छपरूपं वर्णयत।

GROUP—B

2. (क) यथानिर्देशं शब्दरूपाणि लिखत— 1×3=3

(i) नर-शब्दस्य चतुर्थ्येकवचने

(ii) लता-शब्दस्य सप्तम्येकवचने

(iii) युष्मद्-शब्दस्य तृतीयाबहुवचने

(ख) यथानिर्देशं धातुरूपाणि लिखत— 1×3=3

(i) गम्-धातोः लङि प्रथमपुरुष-बहुवचने

(ii) पठ्-धातोः लृटि उत्तमपुरुषैकवचने

(iii) अस्-धातोः विधिलिङि मध्यमपुरुषैकवचने

(Continued)

(ग) द्वयोः (2) समासनाम लिखत— 1×2=2

(i) उपकूलम्

(ii) बालकार्थम्

(iii) चतुर्युगम्

(घ) द्वयोः (2) स्त्रीप्रत्यये रूपं लिखत— 1×2=2

(i) कारक

(ii) तापस

(iii) मृड

(ङ) उत्कलभाषया आङ्गलभाषया वा अनुवादं कुरुत— 4

जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च।
तस्मादपरिहार्येऽर्थे न त्वं शोचितुमर्हसि॥

अथवा

प्रजानां विनयाधानाद्रक्षणाद्भरणादपि।
स पिता पितरस्तासां केवलं जन्महेतवः॥

(Turn Over)

schools.aglasem.com
aglasem.com

(च) उत्कलभाषया आङ्गलभाषया **वा** अनुवादं कुरुत— 1×6=6

(i) एकः शकुनिलुब्धकः घनारण्ये प्रतिवसति स्म।

(ii) पुण्यकीर्त्तयः तं पूजयन्ति।

(iii) तत्र चित्राणि अपि न भवन्ति।

(iv) (तत्र) शाकं तथा मिष्टान्नं समानमूल्येन उपलब्धे।

(v) भवतः आगमनकारणं ज्ञातुं शक्नोमि किम्?

(vi) मारीचः सुबाहुः च तस्याः पुत्रौ।

(छ) अधोलिखितम् अनुच्छेदं पठित्वा **त्रिभागेन** $(\frac{1}{3})$ सारं लिखत— 10

एकः महान् न्यग्रोधपादपः आसीत्। तत्र च लघुपतनको नाम वायसः प्रतिवसति स्म। स कदाचित् प्राणयात्रार्थं पुरम् उद्दिश्य प्रचलितः। तदा स पश्यति कश्चित् जालहस्तः ऊर्ध्वकेशः यमकिंकराकारः कश्चित् नरः संमुखः बभूव। अथ तं दृष्ट्वा शङ्कितमनाः व्यचिन्तयत्—यद् अयं दुरात्मा अद्य मम आश्रयवटपादपसंमुखः अभ्येति। तत् न ज्ञायते किमद्य वटवासिनां विहङ्गमानां विनाशः भविष्यति न वा। एवं बहुविधं विचिन्त्य तत्क्षणात् निवृत्त्य तमेव वटपादपं गतवान्। सर्वान् विहङ्गमान् प्रोवाच—भोः! अयं दुरात्मा लुब्धकः जालतण्डुलहस्तः समभ्येति। तत् सर्वथा तस्मिन् विश्वासः न करणीयः। एष जालं प्रसार्य तण्डुलान् प्रक्षेप्स्यति। ते तण्डुलाः

(Continued)

भवद्भिः सर्वैः अपि हालाहलसदृशाः द्रष्टव्याः। एतस्मिन् अवसरे स लुब्धकः वटतले आगत्य जालं प्रसारितवान्। तत्र तण्डुलान् प्रक्षिप्य नातिदूरं गत्वा निभृतः स्थितः। अथ ते पक्षिणः लघुपतनकेन निवारिताः तण्डुलान् हालाहलाङ्कुरानिव वीक्षमाणा निभृताः तस्थुः। एवम् उपदेशपालनेन ते सर्वे सुरक्षिताः।

(ज) **पञ्चानां (5)** वाक्यानां संस्कृतभाषया अनुवादं कुरुत— 2×5=10

(i) Odisha is an old State.
ଓଡ଼ିଶା ଏକ ପୁରାତନ ରାଜ୍ୟ।

(ii) The art of Odisha is very rich.
ଓଡ଼ିଶାର କଳା ଅତି ସମୃଦ୍ଧ।

(iii) Narasimhadeva built the Konark temple.
ନରସିଂହଦେବ କୋଣାର୍କ ମନ୍ଦିର ନିର୍ମାଣ କରିଥିଲେ।

(iv) This is like a chariot.
ଏହା ଏକ ରଥସଦୃଶ।

(v) It has twelve beautiful wheels.
ଏହାର ବାରଟି ରମଣୀୟ ଚକ ରହିଛି।

(Turn Over)

schools.aglasem.com

aglasem.com

(vi) The wheel is the symbol of time.

ଚକ ସମୟର ପ୍ରତୀକ।

(vii) The images of the temple are very lively.

ମନ୍ଦିରର ପ୍ରତିମାସବୁ ଅତି ସଜୀବ।

(viii) The people of the world become astonished by witnessing the art of the temple.

ମନ୍ଦିରର ଶିଳ୍ପକଳା ଦେଖି ବିଶ୍ୱବାସୀ ଚମତ୍କୃତ ହୁଅନ୍ତି।

GROUP—C

3. (क) रेखाङ्कितपदानां सकारणं विभक्तिनिर्णयं कुरुत— 2×3=6

(i) धारापातेन वसुन्धरा क्षणेन सलिलपूर्णा अभूत्।

(ii) अस्मिन्नेव नगरे स्थायिरूपेण निवासः कर्त्तव्यः।

(iii) सूत्रस्येवास्ति मे गतिः।

(ख) सन्धिं कुरुत— 1×2=2

(i) व्याधः + अपि

(ii) योगेन + अन्ते

(Continued)

(ग) सन्धि-विच्छेदं कुरुत— 1×2=2

(i) शीघ्रमेव

(ii) प्रजास्तस्य

(घ) सरलार्थं लिखत— 8

सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज।
अहं त्वां सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः॥

अथवा

अथवा कृतवाग्द्वारे वंशेऽस्मिन्पूर्वसूरिभिः।
मणौ वज्रसमुत्कीर्णे सूत्रस्येवास्ति मे गतिः॥

(ङ) उत्तरं लिखत— 6

कपोती केन रूपेण स्वर्गं गतवती?

अथवा

विश्वामित्रस्य सामर्थ्यविषये वसिष्ठः किम् अकथयत्?

(च) उत्तरं लिखत— 6

रघुवंशस्य नृपाणां गुणावलीं संक्षेपेण लिखत।

अथवा

केशवस्य हलधररूपं वर्णयत।

(Turn Over)

schools.aglasem.com

aglasem.com

(छ) अधोलिखितम् अनुच्छेदं पठित्वा यथानिर्देशम् उत्तरं लिखत—

कस्मिंश्चिद् राज्ये महेन्द्रो नाम भूपतिः आसीत्। स न्यायशीलः उदारः च। एकदा स मन्त्रिभिः सह राज्यस्य परिक्रमां करोति स्म। तत्र स दृष्टवान् यत् कश्चिद् वृद्धः माली उपवने क्षुद्रम् आम्रतरुं रोपयति। राजा तद् उपवनं गतवान्। तं मालिनं पृष्टवान्—किं त्वम् अत्र सेवकः अथवा स्वामी। माली उक्तवान्—नाहं कुत्र सेवारतः। इदम् उपवनं मम पूर्वजानां पितृपितामहानाम्। राजा अवदत्—किं त्वं चिन्तयसि, अस्य वृक्षस्य फलभक्षणाय त्वं जीविष्यसि? आम्रवृक्षः महता कालेन फलं ददाति इति प्रसिद्धम्। वृद्धमाली नरपतेः वचनं श्रुत्वा अकथयत्—अहं येभ्यः वृक्षेभ्यः फलानि आस्वादयामि ते वृक्षाः न मया रोपिताः। अन्यरोपितवृक्षाणां फलानि अहं भक्षयामि। अहमपि अन्यस्य हेतोः फलवृक्षं रोपयामि। फलवृक्षरोपणे परार्थता हि अस्माकं चिराचरिता नीतिः। न कोऽपि स्वार्थाय स्वयं वृक्षं रोपयति। नरपतिः मालिनः श्लाघ्येन विचारेण सन्तुष्टः तं पुरस्कारैः संवर्धितवान्। अतः सुष्ठु वक्तुं शक्यते—

क्रिया परार्थाय च पुण्यसाधिका।

पञ्चानां (5) प्रश्नानाम् उत्तरं लिखत (प्रतिप्रश्नं प्रायशः **वाक्यद्वयेन (2)** उत्तरं दातव्यम्)— 2×5=10

(i) भूपतेः नाम किम्? स कीदृशः आसीत्?

(ii) राज्यभ्रमणकाले राजा किं दृष्टवान्?

(iii) राजा मालिनं किं पृष्टवान्?

(iv) माली राजानं किम् उक्तवान्?

(v) आम्रवृक्षस्य फलदानविषये किं प्रसिद्धम्?

(vi) नरपतेः वचनं श्रुत्वा वृद्धमाली किम् अकथयत्?

(vii) मालिनः उत्तरेण नरपतिः किं कृतवान्?

★ ★ ★

AglaSem Earn while Learn Program. Send your papers and get paid.
Contact: support@aglasem.com
schools.aglasem.com
aglasem.com

QUESTION PAPERS

GET PREVIOUS YEAR QUESTION PAPERS FOR ALL CLASSES FOR CBSE, ISCSE, ISC AND ALL ALL STATE BOARDS HERE AT AGLASEM.COM

BOARD WISE

- Andhra Pradesh Board Question Papers
- Assam Board Question Papers
- Bihar Board Question Papers
- Chhattisgarh Board Question Papers
- Goa Board Question Papers
- Gujarat Board Question Papers
- Haryana Board Question Papers
- Himachal Pradesh Board Question Papers
- J&K State Board Question Papers
- Jharkhand Board Question Papers
- Karnataka Board Question Papers
- Kerala Board Question Papers
- Madhya Pradesh Board Question Papers
- Maharashtra State Board Question Papers
- Manipur Board Question Papers
- Meghalaya Board Question Papers
- Mizoram Board Question Papers
- Nagaland Board Question Papers
- Orissa Board Question Papers
- Punjab Board Question Papers
- Rajasthan Board Question Papers
- Tamil Nadu Board Question Papers
- Telangana State Board Question Papers
- Tripura Board Question Papers
- Uttarakhand Board Question Papers
- Uttar Pradesh (UP) Board Question Papers
- West Bengal (WB) Board Question Papers